# ગોપીનાથસ્તુતિઃ (ભવિષ્યત્તર પુરાણાં)

નારદ ઉવાચ
દદૃશુસ્તે સુરા દેવં શંખચક્રગદાધરં| પીતાંબરપરીધાનં સર્વતોડક્ષિશિરોમુખં || 1 ||
સર્વતઃ પાણિપાદં તં સર્વસુંદરમીશ્વરં|
નમસ્કૃત્વા સગંધર્વાઃ પૂજયામાસુરચ્યુતં ||
તદા સ્તોત્રં પ્રચક્રુસ્તે સર્વાભીષ્ટપ્રદં નૃણાં | 2 |
દેવા ઊચુઃ
દીનાનાથદયાસિંધો યોગિહૃત્પદ્મસંસ્થિત || 3 ||
અનાદિસિધ્ધ અવ્યક્ત ભૂતાનામીશ્વર પ્રભો |
ત્વં ગતિઃ સર્વલોકાનાં દીનાનાં દીનવત્સલ || 4 ||
અનેકપાપનિકરદાવભૂત જગત્પતે ।
અસ્માકં સર્વશક્તિસ્લં તુભ્યં સર્વાત્મને નમઃ ॥ 5 ||
સર્વભૂતાશયસ્વં હિ સર્વભૂતહૃદિ સ્થિતઃ ।
સર્વભૂતાતિરિક્તસ્વં તુભ્યં સર્વાત્મને નમઃ || 6 ||
જગદ્ભાસ ચિદાભાસ જ્ઞાનગમ્યનમો નમઃ |
ત્રિલોકેશ ગુણાતીત ગુણકોભ નમો નમઃ || 7 ||
નમસ્તે કરુણાનાથ નમસ્તે દાનવાંતક ।
નમસ્તે પાપભીરૂણાં તારકાય નમો નમઃ ॥ 8 ||
શંખાસુરબલઘ્નાય વેદસંરક્ષણાય ચ ।
પાલકાય ચ લોકાનાં મત્સરૂપાય તે નમઃ ॥ 9 ||
સમુદ્રમથને પૂર્વં મંદરાચલધારિણે |
દુષ્ટદાનવહારાય વૈકુંઠાય નમો નમઃ || 10 ||
યજ્ઞવારાહરૂપાય ધરણીતારણાય ચ ।
દુષ્ટઘ્નાય નમસ્તુભ્યં સૃષ્ટિરૂપાય તે નમઃ || 11 ||
હિરણ્યકશિપુઘ્નાય પ્રહ્લાદપ્રિયકારિણે |
અસ્માકં દુઃખહારાય નૃસિંહાય નમો નમઃ || 12 ||
બલિદર્પહરે તુભ્યં શક્રસ્ય પ્રિયકારિણે |
અસ્માકં દુઃખનાશાય વામનાય નમો નમઃ || 13 ||
ક્ષત્રિયસ્ય કુલોત્પન્નનાશકાય નમો નમઃ |
ક્રૂરાયાપિ ચ રામાય નમઃ પરશુધારિણે || 14 ||

## ગોપીનાથસ્તુતિઃ (ભવિષ્યત્તર પુરાણાં)

અસ્માકં બંધનાશાય દશગ્રીવાંતકાય ચ|
મુનિમાનસહંસાય રામચંદ્રાય તે નમઃ || 15 ||

શેષાય દાનવઘ્નાય નમો હલધરાય ચ ।

કંસાંતકાય દેવાય રામકૃષ્ણાય તે નમઃ || 16 ||

તપોરૂપાય મૌનાય નમઃ કારુણ્યમૂર્તયે ।

પાલકાય ચ લોકાનાં બૌધ્ધરૂપાય તે નમઃ || 17 ||

મ્લેચ્છાંતકાય દુષ્ટાનાં દૈત્યાનામંતકાય ચ|
ભક્તિપ્રિયાય દેવાય કલ્કિરૂપાય તે નમઃ || 18 ||

ભયદાય હિ દુષ્ટાનાં દાનવાનાં ભયં ભવેત્ ।

તદા તદાડવતીર્ણાય તુભ્યં કારુણ્યમૂર્તયે || 19 ||

એવં સ્તુત્વા તદા દેવાઃ પુષ્પવૃષ્ટિમવાકિરન્ ।

તાનુવાચ સુરાન્ દેવસ્યપોડહં ભવતાં સ્તવૈઃ || 20 ||

પૂજયા ચૈકભુક્યાચ પ્રાતઃસ્નાનેન ફાલ્ગુને |
સંકષ્ટહરમેતચ્ચ સ્તોત્રં રમ્યં ભવિષ્યતિ || 21 ||

ય ઇદં પઠતે નિત્યં સંકષ્ટં તસ્ય નશ્યતિ ।

એકવારં દ્વિવારં વા ત્રિવારં વાપિ યઃ પઠેત્ || 22 ||

વાંછિતં લભતે નિત્યં યશ આયુઃપ્રવર્ધનં |
સપ્તવારં પઠેન્નિત્યં માસિ ફાલ્ગુનકે સુરાઃ || 23 ||

બ્રાહ્મણો લભતે વિદ્યાં ક્ષત્રિયસ્તુ વસુંધરાં |
ધનં ચ લભતે વૈશ્યાઃ શૂદ્રસ્તુ સુખમશ્રુતે || 24 ||

નાભિમાત્રં જલે સ્થિત્વા માસિ ફાલ્ગુનકે શુભે |
સપ્તવારં પઠેદ્યસ્તુ ભાર્યાં પ્રાપ્પોત્યસંશયઃ || 25 ||

માતૃહા પિતૃહા ચૈવ બ્રહ્મષ્ટો ગુરુતલ્પગઃ ।

સુરાપી દાસિગામી ચ અનેકૈઃ પાતકૈર્વતઃ || 26 ||

સપ્તવારં દિને ભાન્ભાનોશ્ચાભિમુખં પઠેત્ |
નિષ્પાપશ્ચ ભવેત્સડપિ નાત્ર કાર્યા વિચારણા || 27 ||

દશાવર્તં પઠેન્નિત્યં ભૂમિશાયિ જિતેંદ્રિયઃ ।

દેવતાયતને વિદ્વાન્ શુચિમાન્ મમ સન્નિદ્ || 28 ||
ત્રિઃસપ્તાહં પઠેદ્યસ્તુ તસ્ય પુત્રો ભવિષ્યતિ ।
ત્રયસ્તિંશતિવારં તુ યઃ પઠેત્ રજનીમુખે || 29 ||
માસેન ચાનઘાસ્તસ્ય કુષ્ઠનાશો ભવિષ્યતિ ।
વિદ્યાર્થિ લભતે વિદ્યાં ધનાર્થિ લભતે ધનં || 30 ||
કન્યાર્થી લભતે કન્યાં નિષ્કામો મોક્ષમાપ્નુયાત્